## पथः ष्कन्। (७५/१७३९)

पथिन्शब्दाद् द्वितीयासमर्थाद् गच्छति इत्यस्मिन्नर्थे ष्कन् प्रत्ययो भवति। नकारः स्वरार्थः। षकारो ङीषर्थः। पन्थानं गच्छति पथिकः। पथिकी॥

## पन्थो ण नित्यम्। (७६/१७४०)

नित्यग्रहणं प्रत्ययार्थविशेषणम्। पथः पन्थ इत्ययमादेशो भवति [1]णश्च प्रत्ययो नित्यं गच्छति इत्यस्मिन् विषये। पन्थानं नित्यं गच्छति पान्थो भिक्षां याचते। नित्यम् इति किम्? पथिकः॥

## उत्तरपथेनाहृतं च। (७७/१७४१)

निर्देशादेव समर्थविभक्तिः। उत्तरपथशब्दाद् तृतीयासमर्थात् आहृतम् इत्येतस्मिन् [2]विषये ठञ् प्रत्ययो भवति। चकारः प्रत्ययार्थसमुच्चये, गच्छति इति च। अत्रापि तृतीयैव समर्थविभक्तिः। उत्तरपथेनाहृतम् औत्तरपथिकम्। उत्तरपथेन गच्छति औत्तरपथिकः।

[५२२] आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसङ्ख्यानम्। (म.भा.२.३५८)

वारिपथेन आहृतम् वारिपथिकम्। वारिपथेन गच्छति वारिपथिकः। जङ्गलपथेन आहृतम् जाङ्गल–पथिकम्। जङ्गलपथेन गच्छति जाङ्गलपथिकः। स्थलपथेनाहृतम् स्थालपथिकम्। स्थलपथेन गच्छति स्थालपथिकः। कान्तारपथेन आहृतम् कान्तारपथिकम्। कान्तारपथेन गच्छति कान्तारपथिकः।

[५२३] अजपथशङ्कुपथाभ्यां चोपसङ्ख्यानम्। (म.भा.२.३५९)

अजपथेनाहृतम् आजपथिकम्, गच्छति वा आजपथिकः। शङ्कुपथेन आहृतम् शाङ्कुपथिकम्, गच्छति वा शाङ्कुपथिकः।

[५२४] मधुकमरिचयोरण् स्थलात्। (म.भा.२.३५९)

स्थलपथेनाहृतम् स्थालपथं मधुकम्[3]॥

## कालात्। (७८/१७४२)

कालात् इत्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः कालात् इत्येवं तद् वेदितव्यम्। [4]वक्ष्यति – 'तेन निर्वृत्तम्' (५.१.७९/१७४३)। मासेन निर्वृत्तम् मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। कालात् इत्यधिकारः 'व्युष्टादिभ्योऽण्' (५.१.९७/१७६१) इति यावत्॥

1. अण् क. 2. अर्थे फ. ह. 3. मधुयष्टिः इत्यधिकम् ग. 4. वक्ष्यति – इति यावत् नास्ति ङ.